प्राध्यापक एवं कोच प्रतियोगी परीक्षा 2024 (माध्य. शिक्षा विभाग)

216581

**CSL-25**

प्रश्न-पुस्तिका संख्या व बारकोड /
Question Booklet No. & Barcode

इस प्रश्न-पुस्तिका को तब तक न खोलें जब तक कहा न जाए । Do not open this Question Booklet until you are asked to do so.

पुस्तिका में पृष्ठों की संख्या : 16
Number of Pages in Booklet : 16
पुस्तिका में प्रश्नों की संख्या : 150
No. of Questions in Booklet : 150

**Paper Code : 97**

**Paper – II**
**Sub : Sanskrit**

परीक्षा तिथि:- 5/7/2025

**समय : 03:00 घण्टे + 10 मिनट अतिरिक्त***
**Time : 03:00 Hours + 10 Minutes Extra***

**अधिकतम अंक : 300**
**Maximum Marks : 300**

प्रश्न–पुस्तिका के पेपर की सील/पॉलिथीन बैग को खोलने पर प्रश्न–पत्र हल करने से पूर्व परीक्षार्थी यह सुनिश्चित कर लें कि :
- प्रश्न–पुस्तिका संख्या तथा ओ.एम.आर. उत्तर–पत्रक पर अंकित बारकोड संख्या समान हैं ।
- प्रश्न–पुस्तिका एवं ओ.एम.आर. उत्तर–पत्रक के सभी पृष्ठ व सभी प्रश्न सही मुद्रित हैं । समस्त प्रश्न, जैसा कि ऊपर वर्णित है, उपलब्ध हैं तथा कोई भी पृष्ठ कम नहीं है/ मुद्रण त्रुटि नहीं है ।

किसी भी प्रकार की विसंगति या दोषपूर्ण होने पर परीक्षार्थी वीक्षक से दूसरा प्रश्न–पत्र प्राप्त कर लें । यह सुनिश्चित करने की जिम्मेदारी अभ्यर्थी की होगी । परीक्षा प्रारम्भ होने के 5 मिनट पश्चात् ऐसे किसी दावे/आपत्ति पर कोई विचार नहीं किया जायेगा ।

**On opening the paper seal/polythene bag of the Question Booklet before attempting the question paper, the candidate should ensure that :**
- **Question Booklet Number and Barcode Number of OMR Answer Sheet are same.**
- **All pages & Questions of Question Booklet and OMR Answer Sheet are properly printed. All questions as mentioned above are available and no page is missing/misprinted.**

**If there is any discrepancy/defect, candidate must obtain another Question Booklet from Invigilator. Candidate himself shall be responsible for ensuring this. No claim/objection in this regard will be entertained after five minutes of start of examination.**

## परीक्षार्थियों के लिए निर्देश

1. **प्रत्येक प्रश्न के लिये एक विकल्प भरना अनिवार्य है ।**
2. **सभी** प्रश्नों के अंक समान हैं ।
3. प्रत्येक प्रश्न का मात्र **एक** ही उत्तर दीजिए । एक से अधिक उत्तर देने की दशा में प्रश्न के उत्तर को गलत माना जाएगा ।
4. **OMR** उत्तर-पत्रक इस प्रश्न-पुस्तिका के अन्दर रखा है । जब आपको प्रश्न-पुस्तिका खोलने को कहा जाए, तो उत्तर-पत्रक निकाल कर ध्यान से केवल **नीले बॉल पॉइंट पेन** से विवरण भरें ।
5. कृपया अपना रोल नम्बर ओ.एम.आर. उत्तर-पत्रक पर सावधानीपूर्वक सही भरें । गलत रोल नम्बर भरने पर परीक्षार्थी स्वयं उत्तरदायी होगा ।
6. **ओ.एम.आर. उत्तर-पत्रक में करेक्शन पेन/व्हाईटनर/सफेदा का उपयोग निषिद्ध है ।**
7. **प्रत्येक गलत उत्तर के लिए प्रश्न अंक का 1/3 भाग काटा जायेगा ।** गलत उत्तर से तात्पर्य अशुद्ध उत्तर अथवा किसी भी प्रश्न के एक से अधिक उत्तर से है ।
8. **प्रत्येक प्रश्न के पाँच विकल्प दिये गये हैं, जिन्हें क्रमश: 1, 2, 3, 4, 5 अंकित किया गया है । अभ्यर्थी को सही उत्तर निर्दिष्ट करते हुए उनमें से केवल एक गोले (बबल) को उत्तर-पत्रक पर नीले बॉल पॉइंट पेन से गहरा करना है ।**
9. **यदि आप प्रश्न का उत्तर नहीं देना चाहते हैं तो उत्तर-पत्रक में पाँचवें (5) विकल्प को गहरा करें । यदि पाँच में से कोई भी गोला गहरा नहीं किया जाता है, तो ऐसे प्रश्न के लिये प्रश्न अंक का 1/3 भाग काटा जायेगा ।**
10.* **प्रश्न-पत्र हल करने के उपरांत अभ्यर्थी अनिवार्य रूप से ओ.एम.आर. उत्तर-पत्रक जांच लें कि समस्त प्रश्नों के लिये एक विकल्प (गोला) भर दिया गया है । इसके लिये ही निर्धारित समय से 10 मिनट का अतिरिक्त समय दिया गया है ।**
11. **यदि अभ्यर्थी 10% से अधिक प्रश्नों में पांच विकल्पों में से कोई भी विकल्प अंकित नहीं करता है तो उसको अयोग्य माना जायेगा ।**
12. **मोबाइल फोन अथवा अन्य किसी इलेक्ट्रोनिक यंत्र का परीक्षा हॉल में प्रयोग पूर्णतया वर्जित है । यदि किसी अभ्यर्थी के पास ऐसी कोई वर्जित सामग्री मिलती है तो उसके विरुद्ध आयोग द्वारा नियमानुसार कार्यवाही की जायेगी ।**

**चेतावनी :** अगर कोई अभ्यर्थी नकल करते पकड़ा जाता है या उसके पास से कोई अनधिकृत सामग्री पाई जाती है, तो उस अभ्यर्थी के विरुद्ध पुलिस में प्राथमिकी दर्ज कराते हुए राजस्थान सार्वजनिक परीक्षा (भर्ती में अनुचित साधनों की रोकथाम अध्युपाय) अधिनियम, 2022 तथा अन्य प्रभावी कानून एवं आयोग के नियमों-प्रावधानों के तहत कार्यवाही की जाएगी । साथ ही आयोग ऐसे अभ्यर्थी को भविष्य में होने वाली आयोग की समस्त परीक्षाओं से विवर्जित कर सकता है ।

## INSTRUCTIONS FOR CANDIDATES

1. **It is mandatory to fill one option for each question.**
2. **All** questions carry equal marks.
3. Only **one** answer is to be given for each question. If more than **one** answers are marked, it would be treated as wrong answer.
4. The **OMR** Answer Sheet is inside this Question Booklet. When you are directed to open the Question Booklet, take out the Answer Sheet and fill in the particulars carefully with **Blue Ball Point Pen** only.
5. Please correctly fill your Roll Number in **OMR** Answer Sheet. Candidates will themselves be responsible for filling wrong Roll No.
6. **Use of Correction Pen/Whitener in the OMR Answer Sheet is strictly forbidden.**
7. **1/3 part of the mark(s) of each question will be deducted for each wrong answer.** A wrong answer means an incorrect answer or more than one answers for any question.
8. **Each question has five options marked as 1, 2, 3, 4, 5. You have to darken only one circle (bubble) indicating the correct answer on the Answer Sheet using BLUE BALL POINT PEN.**
9. **If you are not attempting a question then you have to darken the circle '5'. If none of the five circles is darkened, one third (1/3) part of the marks of question shall be deducted.**
10.* **After solving question paper, candidate must ascertain that he/she has darkened one of the circles (bubbles) for each of the questions. Extra time of 10 minutes beyond scheduled time, is provided for this.**
11. **A candidate who has not darkened any of the five circles in more than 10% questions shall be disqualified.**
12. **Mobile Phone or any other electronic gadget in the examination hall is strictly prohibited. A candidate found with any of such objectionable material with him/her will be strictly dealt with as per rules.**

**Warning :** If a candidate is found copying or if any unauthorized material is found in his/her possession, F.I.R. would be lodged against him/her in the Police Station and he/she would be liable to be prosecuted under **Rajasthan Public Examination (Measures for Prevention of Unfair means in Recruitment) Act, 2022 & any other laws applicable and Commission's Rules-Regulations.** Commission may also debar him/her permanently from all future examinations.

**उत्तर–पत्रक में दो प्रतियाँ हैं – मूल प्रति और कार्बन प्रति । परीक्षा समाप्ति पर परीक्षा कक्ष छोड़ने से पूर्व परीक्षार्थी उत्तर–पत्रक की दोनों प्रतियाँ वीक्षक को सौंपेंगे, परीक्षार्थी स्वयं कार्बन प्रति अलग नहीं करें । वीक्षक उत्तर–पत्रक की मूल प्रति को अपने पास जमा कर, कार्बन प्रति को मूल प्रति से कट लाइन से मोड़ कर सावधानीपूर्वक अलग कर परीक्षार्थी को सौंपेंगे, जिसे परीक्षार्थी अपने साथ ले जायेंगे । परीक्षार्थी को उत्तर–पत्रक की कार्बन प्रति चयन प्रक्रिया पूर्ण होने तक सुरक्षित रखनी होगी एवं आयोग द्वारा माँगी जाने पर प्रस्तुत करनी होगी ।**

1. 'अस्' धातोः विधिलिङ्लकारस्य उत्तमपुरुषे रूपाणि सन्ति –

(1) आसम्  आस्व  आस्म

(2) स्याम्  स्याव  स्याम

(3) स्याम्  स्यावः  स्यामः

(4) स्याः  स्याव  स्याम

(5) अनुत्तरितः प्रश्नः

2. 'कृ' धातोः (परस्मैपदे) लङ्लकारे रूपं प्राप्यते –

(1) अकरोः  (2) अकुरुथाः

(3) अकुर्वी  (4) अकुर्मः

(5) अनुत्तरितः प्रश्नः

3. 'कृ' धातोः लोट्लकारस्य उत्तमपुरुषस्य रूपाणि सन्ति –

(1) करवाणि  करवावः  करवामः

(2) करवाणि  करवाव  करवाम

(3) कुरु  कुरुतम्  कुरुत

(4) करवाणि  करवाम  करवाव

(5) अनुत्तरितः प्रश्नः

4. 'याच्' धातोः (आत्मने) लोट्लकारस्य मध्यमपुरुषस्य द्विवचनस्य रूपं भवति –

(1) याचतम्  (2) याचेतम्

(3) याचेताम्  (4) याचेथाम्

(5) अनुत्तरितः प्रश्नः

5. अस्-धातोः विधिलिङि उत्तमपुरुषस्य एकवचने रूपं भवति –

(1) स्याम्  (2) स्याम

(3) स्यानि  (4) असानि

(5) अनुत्तरितः प्रश्नः

6. लभ्-धातोः लङ्लकारे रूपं न प्राप्यते –

(1) अलभत  (2) अलभन्त

(3) अलब्ध  (4) अलभे

(5) अनुत्तरितः प्रश्नः

7. 'जग्धः' इत्यत्र धातुप्रत्ययौ स्तः –

(1) जग् + क्त  (2) अद् + क्त

(3) अद् + शतृ  (4) अद् + क्त्वा

(5) अनुत्तरितः प्रश्नः

8. 'स्तुत्यः' इत्यत्र प्रत्ययः अस्ति –

(1) यत्  (2) ण्यत्

(3) क्यप्  (4) ल्यप्

(5) अनुत्तरितः प्रश्नः

9. 'समीक्ष्य' इत्यत्र प्रत्ययो वर्तते –

(1) यत्  (2) त्यप्

(3) ल्यप्  (4) क्यप्

(5) अनुत्तरितः प्रश्नः

10. 'शीर्णः' इत्यत्र कृत्-प्रत्ययः अस्तिः –

(1) इन्  (2) क्तः

(3) शानच्  (4) अनीयर्

(5) अनुत्तरितः प्रश्नः

11. 'ण्यत्' प्रत्ययान्तः शब्दोऽस्ति –

(1) लेखितव्यम्  (2) आकृष्य

(3) गेयम्  (4) कार्यम्

(5) अनुत्तरितः प्रश्नः

12. 'सेव्' धातोः विधिलिङ्लकारस्य मध्यमपुरुषस्य रूपक्रमो वर्तते –

(1) सेवेथाः  सेवेयाताम्  सेवेध्वम्

(2) सेवस्व  सेवेयाथाम्  सेवेध्वम्

(3) सेवेथाः  सेवेयाथाम्  सेवेध्वम्

(4) सेवताम्  सेवेयाथाम्  सेवेध्वम्

(5) अनुत्तरितः प्रश्नः

13. 'कनिष्ठः' इत्यत्र प्रकृतिप्रत्ययौ स्तः –
(1) युवक + इष्ठन्  (2) युव् + इष्ठन्
(3) कन् + इष्ठन्  (4) युवन् + इष्ठन्
(5) अनुत्तरितः प्रश्नः

14. 'अन्नमयो यज्ञः' इत्यत्र मयट् प्रत्ययः विद्यते –
(1) अधिकरणे  (2) भावे
(3) अपादाने  (4) सम्बोधने
(5) अनुत्तरितः प्रश्नः

15. 'ङीप्' प्रत्ययान्तं शब्दं चिनुत –
(1) वैदी  (2) नर्तकी
(3) सुमङ्गली  (4) नारी
(5) अनुत्तरितः प्रश्नः

16. मत्ता गोष्ठी गर्भमूढप्रलापा प्रौढा गाढालिङ्गिता यौवनेन रेखाङ्कितं उदाहरणमस्ति –
(1) मन्दाक्रान्तावृत्तस्य
(2) मालिनीवृत्तस्य
(3) शालिनीवृत्तस्य
(4) वियोगिनीवृत्तस्य
(5) अनुत्तरितः प्रश्नः

17. द्वितीयचरणे अष्टादशमात्रायुक्तं छन्दो भवति –
(1) हरिणी  (2) शार्दूलविक्रीडितम्
(3) आर्या  (4) शिखरिणी
(5) अनुत्तरितः प्रश्नः

18. द्रुतविलम्बितवृत्ते भगणः भवति –
(1) एकः  (2) द्वौ
(3) त्रयः  (4) चत्वारः
(5) अनुत्तरितः प्रश्नः

19. 'कृतिः' इत्यत्र क्तिन्-प्रत्ययः विद्यते –
(1) भावे  (2) सम्बन्धे
(3) सम्बोधने  (4) अधिकरणे
(5) अनुत्तरितः प्रश्नः

20. मगण-सगण-जगण-सगण-तगण-तगण-गुरुक्रमेण वर्णाः भवन्ति –
(1) शार्दूलविक्रीडितम्  (2) स्रग्धरा
(3) शिखरिणी  (4) हरिणी
(5) अनुत्तरितः प्रश्नः

21. अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनःश्रुतिः – एतल्लक्षणं वर्तते –
(1) श्लेषालङ्कारस्य
(2) यमकालङ्कारस्य
(3) निदर्शनालङ्कारस्य
(4) अनुप्रासालङ्कारस्य
(5) अनुत्तरितः प्रश्नः

22. लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥
इत्यत्र अलङ्कारो वर्तते –
(1) व्यतिरेकालङ्कारः
(2) सन्देहालङ्कारः
(3) उत्प्रेक्षाऽलङ्कारः
(4) विशेषोक्त्यलङ्कारः
(5) अनुत्तरितः प्रश्नः

23. बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति ।
सम्भूयाम्भोधिमभ्येति महानद्या नगापगा ॥
अत्र को नामधेयोऽलङ्कारो वर्तते ?
(1) समासोक्तिः
(2) अर्थान्तरन्यासः
(3) विशेषोक्तिः
(4) अतिशयोक्तिः
(5) अनुत्तरितः प्रश्नः

24. मालिनीवृत्तस्य उदाहरणं वर्तते –
(1) यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलताम् ।
(2) रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ।
(3) शान्तानुकूलपवनश्च शिवश्च पन्थाः ।
(4) किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।
(5) अनुत्तरितः प्रश्नः

216581 216581 216581 216581

**25.** "नव पलाश पलाशवनं पुरः" अत्र कोऽलङ्कारः ?

(1) श्लेषः (2) अनुप्रासः

(3) यमकम् (4) उपमा

(5) अनुत्तरितः प्रश्नः

**26.** 'अतिनिद्रम्' इति समासस्य लौकिकं विग्रहवाक्यम् अस्ति –

(1) निद्रा सम्प्रति युज्यते

(2) अति निद्रा सम्प्रति युज्यते

(3) निद्रा सम्प्रति न युज्यते

(4) अति निद्रा सम्प्रति न युज्यते

(5) अनुत्तरितः प्रश्नः

**27.** अधोलिखितेषु विभक्त्यर्थस्योदाहरणं वर्तते :

(1) नखनिर्भिन्नः (2) उपकृष्णम्

(3) इतिहरि (4) अधिहरि

(5) अनुत्तरितः प्रश्नः

**28.** 'स्त्रीप्रमाणः' इत्यत्र समासः विद्यते

(1) अव्ययीभावः (2) तत्पुरुषः

(3) बहुव्रीहिः (4) द्वन्द्वः

(5) अनुत्तरितः प्रश्नः

**29.** 'चार्थे द्वन्द्वः' इत्यत्र चकारः कतिविधः स्वीकृत –

(1) पञ्चविधः (2) षड्विधः

(3) चतुर्विधः (4) त्रिविधः

(5) अनुत्तरितः प्रश्नः

**30.** "कपाले मार्जारः पय इति करान् लेढि शशिनः" उदाहरणं वर्तते

(1) उपमायाः

(2) रूपकस्य

(3) भ्रान्तिमतः (भ्रान्तिमान्)

(4) दीपकस्य

(5) अनुत्तरितः प्रश्नः

**31.** मुक्ति के लिए विष्णु को भजता है – इत्यस्य संस्कृतानुवाद अस्ति –

(1) मुक्तिना विष्णुं भजति

(2) मुक्तये विष्णुः भजति

(3) मुक्तये विष्णुं भजति

(4) मुक्तिं विष्णुं भजति

(5) अनुत्तरितः प्रश्नः

**32.** गुरु छात्रों से प्रश्न पूछे ।

अस्य वाक्यस्य शुद्धः संस्कृतानुवादोऽस्ति –

(1) गुरुः छात्रेभ्यः प्रश्नं पृच्छतु

(2) गुरुः छात्रैः प्रश्नं पृच्छत

(3) गुरुः छात्रेषु प्रश्नं पृच्छेः

(4) गुरुः छात्रान् प्रश्नं पृच्छेत्

(5) अनुत्तरितः प्रश्नः

**33.** गर्गों को सौ रुपये दण्ड करता है –

इत्यस्य संस्कृतानुवादः वर्तते –

(1) गर्गान् शतं दण्डयति

(2) गर्गेभ्यः शतं दण्डयति

(3) गर्गेभ्यः शतेन दण्डयति

(4) गर्गान् शतेन दण्डयति

(5) अनुत्तरितः प्रश्नः

**34.** उस बालक से यह बालक पढ़ने में कुशल है ।

अस्य वाक्यस्य शुद्धः संस्कृतानुवादोऽस्ति –

(1) अस्य बालकस्य दृष्ट्या स बालकः अध्ययने कुशलो वर्तते ।

(2) तस्माद् बालकाद् अयं बालकः अध्ययने पटुतरः ।

(3) तस्मै बालकाय अपेक्षया एष बालकः अध्ययने निपुणोऽस्ति ।

(4) अमुष्माद् बालकाद् स बालकः पठने निपुणो वर्तते ।

(5) अनुत्तरितः प्रश्नः

**35.** 'दन्तानां राजानः' इति विग्रहस्य समस्तं पदं किम् ?

(1) दन्तराजः (2) दन्तराजा

(3) दन्ताराजः (4) राजदन्ताः

(5) अनुत्तरितः प्रश्नः

216581

36. अस्मिन् जगति गुरोः अन्तरेण ज्ञानं भवितुं नार्हति । अत्र "गुरोः" पदस्य स्थाने शुद्धप्रयोगो भविष्यति –
(1) गुरुणा (2) गुरुम्
(3) गुरवे (4) गुरौ
(5) अनुत्तरितः प्रश्नः

37. अशुद्धं वाक्यं चिनुत –
(1) हरेः परितः भक्ताः सन्ति
(2) लङ्कां निकषा समुद्रः वर्तते
(3) वासुदेवं परितः गोपाङ्गनाः सन्ति
(4) बलरामम् अभितः यमुना अस्ति
(5) अनुत्तरितः प्रश्नः

38. शुद्धं वाक्यं चिनुत –
(1) स रामम् उपहारं ददाति ।
(2) रामलक्ष्मणौ संवादं शृणु ।
(3) परिश्रमिणां न किञ्चिद् दुर्लभम् ।
(4) अस्य त्यागः प्रशंसनीयम् ।
(5) अनुत्तरितः प्रश्नः

39. समासालोके अशुद्धवाक्यं चिनुत –
(1) मातृपितृभ्यां नमः
(2) मातापितरौ सेवनीयौ
(3) पाणिपादस्य व्यापारं बिना योगः नैव जायते
(4) प्रतिवर्षम् उज्जयिन्यां हरिहरयोः मेलनं भवति
(5) अनुत्तरितः प्रश्नः

40. इन्द्र के लिए पशु को देता है – वाक्यस्योचितसंस्कृतानुवादः अस्ति –
(1) पशुना इन्द्रं यजते
(2) पशुः इन्द्रं यजते
(3) पशुं इन्द्राय यजते
(4) पशुना इन्द्राय यजते
(5) अनुत्तरितः प्रश्नः

41. नचिकेतुः द्वितीयवर आसीत्
(1) पितुस्तोषणम् (2) आत्मज्ञानम्
(3) अग्निविज्ञानम् (4) स्वजीवनम्
(5) अनुत्तरितः प्रश्नः

42. कस्य प्रज्ञा प्रतिष्ठिता भवति ?
(1) यस्य वशे कर्माणि
(2) यस्य वशे इन्द्रियाणि
(3) यस्य समीपे धनानि
(4) यस्य समीपे प्रभुत्वम्
(5) अनुत्तरितः प्रश्नः

43. महात्मनां स्वभावसिद्धलक्षणं नास्ति –
(1) विपद्यधैर्यम् (2) अभ्युदये क्षमा
(3) युधि विक्रमः (4) सदसि वाक्पटुता
(5) अनुत्तरितः प्रश्नः

44. भारविमते कीदृशं वचो दुर्लभम् ?
(1) सत्यं, प्रियं च
(2) सुखदं, परुषं च
(3) सन्तोषप्रदम्, अनुद्वेगकरं च
(4) हितं, मनोहारि च
(5) अनुत्तरितः प्रश्नः

45. मेघदूते (पूर्वमेघे) मेघप्रकाराः कतिधा वर्णिताः सन्ति ?
(1) द्विधा (2) त्रिधा
(3) चतुर्धा (4) पञ्चधा
(5) अनुत्तरितः प्रश्नः

46. सर्वैः जनैः प्रतिदिनं भोजने <u>दधिघृते</u> भोजनीयम् । अत्र समासाश्रित्य शुद्धः शब्दोऽस्ति –
(1) दधिघृतम् (2) दधिघृतेभ्यो
(3) दधिघृतौ (4) दधिघृतेन
(5) अनुत्तरितः प्रश्नः

216581

47. कण्वमते गुरुशुश्रूषया युवतयः प्राप्नुवन्ति –
(1) भार्यापदम् (2) वामापदम्
(3) गृहिणीपदम् (4) महिषीपदम्
(5) अनुत्तरितः प्रश्नः

48. 'पुत्रः पितुर्जनितरोष इवास्मि भीतः' – एतत् कथनमस्ति –
(1) यौगन्धरायणस्य
(2) राज्ञः उदयनस्य
(3) मगधनरेशदर्शकस्य
(4) पद्मावत्याः
(5) अनुत्तरितः प्रश्नः

49. अन्तरिक्षेण पततां वीनां पदं को वेद –
(1) इन्द्रदेवः (2) अग्निदेवः
(3) हिरण्यगर्भः (4) वरुणदेवः
(5) अनुत्तरितः प्रश्नः

50. *पुरुष एवेदं सर्वम्* कण्डिायामस्यां छन्दः वर्तते –
(1) त्रिष्टुप् (2) अनुष्टुप्
(3) उष्णिक् (4) गायत्री
(5) अनुत्तरितः प्रश्नः

51. अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमम् ।
अस्मिन् मन्त्रे अग्निदेवं स्तौति –
(1) विश्वामित्रः (2) गृत्समदः
(3) वसिष्ठः (4) भरद्वाजः
(5) अनुत्तरितः प्रश्नः

52. गुरूपदेशः पुरुषाणां कीदृशं स्नानमस्ति ?
(1) अखिलमलप्रक्षालनक्षमं गङ्गाजलस्नानम् ।
(2) अखिलमलप्रक्षालनक्षमं कुम्भस्नानम् ।
(3) अखिलमलप्रक्षालनक्षमम जलं स्नानम् ।
(4) अखिलमलप्रक्षालनक्षमं फेनिलयुक्त जलस्नानम् ।
(5) अनुत्तरितः प्रश्नः

53. 'संसमिद्युवसे वृषन्नग्ने' इत्यस्य मन्त्रस्य देवता वर्तते –
(1) हिरण्यगर्भः (2) वरुणः
(3) अग्निः (4) विष्णुः
(5) अनुत्तरितः प्रश्नः

54. चतुर्णां वेदानां समुचितः क्रमो वर्तते –
(1) ऋग्वेदः, सामवेदः, यजुर्वेदः, अथर्ववेदः
(2) ऋग्वेदः, अथर्ववेदः, सामवेदः, यजुर्वेदः
(3) ऋग्वेदः, यजुर्वेदः, अथर्ववेदः, सामवेदः
(4) ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः
(5) अनुत्तरितः प्रश्नः

55. माध्यन्दिशतपथब्राह्मणस्य आदौ प्राप्यते –
(1) अग्न्याधानम् (2) सोमयागः
(3) दर्शपौर्णमासः (4) आग्रयणम्
(5) अनुत्तरितः प्रश्नः

56. देशे काल उपायेन द्रव्यं श्रद्धासमन्वितम् ।
पात्रे प्रदीयते यत् तदेतत् सकलं लक्षणं वर्तते –
(1) धर्मस्य (2) ज्ञानस्य
(3) सद्व्यवहारस्य (4) परोपकारस्य
(5) अनुत्तरितः प्रश्नः

57. उपनयनं यावत् सर्वाः क्रियाः सम्पाद्य ब्रह्मचारिणे वेदज्ञानं प्रयच्छति –
(1) आचार्यः (2) गुरुः
(3) उपाध्यायः (4) कुलपतिः
(5) अनुत्तरितः प्रश्नः

58. 'समानीव आकूतिः' इत्यत्र 'आकूतिः' इत्यस्यार्थोऽस्ति –
(1) अभिलाषा (2) जिज्ञासा
(3) प्रतिज्ञा (4) सङ्कल्पः
(5) अनुत्तरितः प्रश्नः

59. राज्ञो जनमेजयस्य सर्पयज्ञस्य वर्णनं– कस्मिन् पर्वणि प्राप्यते ?

(1) आदिपर्वणि (2) शान्तिपर्वणि

(3) सभापर्वणि (4) उद्योगपर्वणि

(5) अनुत्तरित: प्रश्न:

60. गङ्गाया: कार्तिकेयस्योत्पत्तिप्रसङ्ग: प्राप्यते –

(1) अरण्यकाण्डे (2) बालकाण्डे

(3) अयोध्याकाण्डे (4) किष्किन्धाकाण्डे

(5) अनुत्तरित: प्रश्न:

61. बृहत् त्रय्यां गणना भवति –

(1) किरातार्जुनीयम्, शिशुपालवधम्, सीताचरितम्

(2) नैषधीयचरितम्, किरातार्जुनीयम्, शिशुपालवधम्

(3) शिशुपालवधम्, हर्षचरितम्, कुमारसम्भवम्

(4) नैषधीयचरितम्, किरातार्जुनीयम्, रघुवंश महाकाव्यम्

(5) अनुत्तरित: प्रश्न:

62. भीनमालं जन्मस्थानं वर्तते –

(1) कुमारदासस्य

(2) अम्बिकादत्तव्यासस्य

(3) भट्टमथुरानाथशास्त्रिण:

(4) माघस्य

(5) अनुत्तरित: प्रश्न:

63. ब्राह्मविवाहसमुत्पन्नपुत्र: स्वपूर्वपुरुषान् स्वपुत्रानात्मानञ्च आहत्य पावयति –

(1) षट् पुरुषान्

(2) सप्त पुरुषान्

(3) दश पुरुषान्

(4) एकविंशति पुरुषान्

(5) अनुत्तरित: प्रश्न:

64. मुकुटताडितकम् नाटकं वर्तते –

(1) बाणभट्टस्य (2) शूद्रकस्य

(3) भासस्य (4) भवभूते:

(5) अनुत्तरित: प्रश्न:

65. 'शारिपुत्रप्रकरणम्' इत्यस्य नाटकस्य लेखकोऽस्ति –

(1) भट्टनारायण: (2) हर्षवर्धन:

(3) विशाखदत्त: (4) अश्वघोष:

(5) अनुत्तरित: प्रश्न:

66. जयपुरवैभवम् रचना वर्तते –

(1) देवर्षिकलानाथशास्त्रिण:

(2) भट्टमथुरानाथशास्त्रिण:

(3) राजेन्द्रप्रसादमिश्रस्य

(4) प्रभाकरशास्त्रिण:

(5) अनुत्तरित: प्रश्न:

67. अधोलिखितेषु काव्येषु भट्टमथुरानाथशास्त्रि विरचितं काव्यं नास्ति :

(1) महर्षि कुलवैभवम् (2) भारतवैभवम्

(3) गोविन्दवैभवम् (4) साहित्यवैभवम्

(5) अनुत्तरित: प्रश्न:

68. 'जीवनस्य पृष्ठद्वयम्' कस्य रचना वर्तते ?

(1) भट्टमथुरानाथशास्त्रिण:

(2) देवर्षिकलानाथशास्त्रिण:

(3) शिवसागरत्रिपाठिन:

(4) प्रभाकरशास्त्रिण:

(5) अनुत्तरित: प्रश्न:

69. 'हर्षचरिते' कति उच्छ्वासा: सन्ति ?

(1) एकादश (2) द्वादश

(3) नव (4) अष्टौ

(5) अनुत्तरित: प्रश्न:

216581 216581 216581 216581

70. 'श्री:' इत्यत्र प्रथमाविभक्ति: कस्मिन् अर्थे भवति ?
(1) प्रातिपदिकार्थमात्रे (2) लिङ्गमात्राधिक्ये
(3) परिमाणमात्रे (4) वचनमात्रे
(5) अनुत्तरित: प्रश्न:

71. 'ग्राममजां वहति' इत्यत्र ग्रामशब्दे कां सञ्ज्ञां प्रबाध्य कर्मसञ्ज्ञा भवति ?
(1) करणसञ्ज्ञाम् (2) अधिकरणसञ्ज्ञाम्
(3) सम्प्रदानसञ्ज्ञाम् (4) कर्तृसञ्ज्ञाम्
(5) अनुत्तरित: प्रश्न:

72. 'अन्तरेण' इति शब्दस्य योगे भवति
(1) प्रथमाविभक्ति: (2) तृतीयाविभक्ति:
(3) द्वितीयाविभक्ति: (4) चतुर्थीविभक्ति:
(5) अनुत्तरित: प्रश्न:

73. 'हेतौ' इति सूत्रस्योदाहरणं वर्तते –
(1) पुण्येन दृष्टो हरि:
(2) अलं श्रमेण
(3) अह्ना क्रोशेन वाऽनुवाकोऽधीत:
(4) द्विद्रोणेन धान्यं क्रीणाति
(5) अनुत्तरित: प्रश्न:

74. क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप: इति सूत्रे 'द्रोह:' इत्यस्य अर्थ: अस्ति –
(1) अमर्ष:
(2) अपकार:
(3) अक्षमा
(4) गुणेषु दोषाविष्करणम्
(5) अनुत्तरित: प्रश्न:

75. 'प्राणाहुति:' इति रूपकस्य प्रणेता अस्ति –
(1) डॉ. हरिराम आचार्य:
(2) डॉ. नारायणशास्त्री काङ्कर:
(3) डॉ. शिवसागर त्रिपाठी
(4) डॉ. रूपनारायण त्रिपाठी
(5) अनुत्तरित: प्रश्न:

76. वारणार्थानामीप्सित: इति सूत्रे 'वारणम्' अस्ति
(1) प्रवृत्ति: (2) निवृत्ति:
(3) विघात: (4) प्रवृत्तिविघात:
(5) अनुत्तरित: प्रश्न:

77. नियमपूर्वकविद्यास्वीकारे वक्ता भवति –
(1) करणसञ्ज्ञ: (2) अपादानसञ्ज्ञ:
(3) सम्प्रदानसञ्ज्ञ: (4) अधिकरणसञ्ज्ञ:
(5) अनुत्तरित: प्रश्न:

78. 'अधीगर्थदयेशां कर्मणि' इति सूत्रस्य अर्थो विद्यते –
(1) अधिगर्थदयेशां कर्मणि द्वितीया स्यात् ।
(2) अधिगर्थदयेशां कर्मणि षष्ठी स्यात् ।
(3) अधिगर्थदयेशां कर्मणि षष्ठी न स्यात् ।
(4) अधिगर्थदयेशां कर्मणि शेषे षष्ठी स्यात् ।
(5) अनुत्तरित: प्रश्न:

79. 'गोषु दुह्यमानासु गत:' इत्यत्र सप्तमी-विभक्तिविधायकं सूत्रं वर्तते –
(1) सप्तम्यधिकरणे च
(2) यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी
(3) यस्य च भावेन भावलक्षणम्
(4) यतश्च निर्धारणम्
(5) अनुत्तरित: प्रश्न:

80. 'द्विपिनं चर्मणि हन्ति' इति वाक्ये चर्मणि सप्तमीविभक्ति: केन वार्तिकेन ?
(1) क्तस्येन्विषयस्य कर्मण्युपसङ्ख्यानम्
(2) साध्वसाधुप्रयोगे च
(3) निमित्तात्कर्मयोगे
(4) अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च
(5) अनुत्तरित: प्रश्न:

81. ण्यन्तधारि धातो: योगे उत्तमर्ण: भवति –
(1) अपादानसञ्ज्ञ: (2) सम्प्रदानसञ्ज्ञ:
(3) अधिकरणसञ्ज्ञ: (4) करणसञ्ज्ञ:
(5) अनुत्तरित: प्रश्न:

82. असंयुक्तध्वनिभिः सह कस्य नियमस्य सम्बन्धो भवति ?

(1) लैटिन नियमस्य (2) प्राकृत नियमस्य

(3) ग्रीक नियमस्य (4) ग्रिम नियमस्य

(5) अनुत्तरितः प्रश्नः

83. ध्वनिनियमेषु मूलभारोपीयशब्देषु द्वयोः स्वरयोः मध्ये स् इत्यस्य परिवर्तनं र् भवति –

(1) लैटिननियमे (2) ग्रीकनियमे

(3) फारसीनियमे (4) ओष्ठयनियमे

(5) अनुत्तरितः प्रश्नः

84. एतस्य वर्गस्य भाषाणां वाक्येषु सर्वेशब्दाः स्वतन्त्राः भवन्ति –

(1) प्रत्ययप्रधानवर्गस्य

(2) योगात्मकवर्गस्य

(3) विभक्तिप्रधानवर्गस्य

(4) अयोगात्मकवर्गस्य

(5) अनुत्तरितः प्रश्नः

85. भाषाविज्ञानस्य उच्चारणस्थानानुगुणं फ़ इत्यस्य उच्चारणस्थानं विद्यते –

(1) दन्तोष्ठयम् (2) तालव्यम्

(3) दन्त्यम् (4) उपालिजिह्वीयम्

(5) अनुत्तरितः प्रश्नः

86. भाषायाः उत्पत्तिसिद्धान्तेषु अनुकरणसिद्धान्तरूपेण न गण्यते –

(1) अनुकरणमूलकतावादः

(2) भों-भों-वादः

(3) शब्दानुकरणवादः

(4) पूह-पूहवादः

(5) अनुत्तरितः प्रश्नः

87. करणवैकल्याद् अशक्तेः भेदाः भवन्ति –

(1) चतुर्विंशति भेदाः

(2) पञ्चविंशति भेदाः

(3) सप्तविंशति भेदाः

(4) अष्टाविंशति भेदाः

(5) अनुत्तरितः प्रश्नः

88. तर्कभाषामते अर्थापत्तेः अन्तर्भावः स्वीक्रियते –

(1) प्रत्यक्षे (2) अनुमाने

(3) उपमाने (4) अभावे

(5) अनुत्तरितः प्रश्नः

89. स्वार्थपरार्थभेदेन द्विविधं भवति –

(1) स्वार्थानुमानम् (2) प्रत्यक्षज्ञानम्

(3) अनुमानम् (4) परार्थानुमानम्

(5) अनुत्तरितः प्रश्नः

90. चार्वाकनये उपाधेः विशेषणानि भवन्ति

(1) त्रीणि (2) चत्वारि

(3) पंच (4) षट्

(5) अनुत्तरितः प्रश्नः

91. 'यः स्वयम् असिद्धः स कथं परान् साधयति' एष सिद्धान्तो मन्यते –

(1) बौद्धस्य (2) नैयायिकस्य

(3) मीमांसकस्य (4) चार्वाकस्य

(5) अनुत्तरितः प्रश्नः

92. साख्यकारिकानुसारं बुद्धेः सात्विकरूपं नास्ति –

(1) धर्मः (2) ज्ञानम्

(3) अनैश्वर्यम् (4) विरागः

(5) अनुत्तरितः प्रश्नः

93. देवानां गृहेषु-उपवनेषु च सृष्टिः भवति –

(1) क्रियात्मिका सृष्टिः

(2) पारिश्रमिक सृष्टिः

(3) मानसी सृष्टिः

(4) रचनात्मिका सृष्टिः

(5) अनुत्तरितः प्रश्नः

94. कीदृक् प्रेक्षागृहं प्रशस्यम् ?

(1) ज्येष्ठम् (2) मध्यमम्

(3) कनीयम् (4) ज्येष्ठतमम्

(5) अनुत्तरितः प्रश्नः

95. 'अभिलाष-विरह-ईर्ष्या-प्रवास-शापाः' इमे भेदाः सन्ति –

(1) विप्रलम्भशृङ्गारस्य

(2) सम्भोगशृङ्गारस्य

(3) हास्यरसस्य

(4) करुणरसस्य

(5) अनुत्तरितः प्रश्नः

96. काव्यप्रकाशानुसारं "वाच्यचित्रम्" कीदृशं काव्यं वर्तते ?

(1) मध्यमम् (2) उत्तमम्

(3) अवरम् (4) उत्तमोत्तमम्

(5) अनुत्तरितः प्रश्नः

97. गुणालङ्कार रीतयः प्रोक्ताः

(1) आनन्द हेतवः (2) अपकर्ष हेतवः

(3) रसहेतवः (4) उत्कर्ष हेतवः

(5) अनुत्तरितः प्रश्नः

98. नाट्यशास्त्रस्य प्रथमोऽध्यायः वर्तते –

(1) नाट्यपरिचयः (2) नाट्यागमः

(3) नाट्योत्पत्तिः (4) नाट्यारम्भः

(5) अनुत्तरितः प्रश्नः

2165581

99. 'कुन्ताः प्रविशन्ति' इत्यत्र कीदृशी लक्षणा वर्तते ?

(1) गौणी प्रयोजनवती लक्षणलक्षणा सारोपा

(2) गौणी प्रयोजनवती लक्षणलक्षणा साध्यवसाना

(3) शुद्धा प्रयोजनवती उपादानलक्षणा साध्यवसाना

(4) शुद्धा प्रयोजनवती लक्षणलक्षणा सारोपा

(5) अनुत्तरितः प्रश्नः

100. 'साहित्यदर्पणानुगुणम्' अधोलिखितेषु एकं रसस्य स्वरूप-गतवैशिष्टयं नास्ति –

(1) ब्रह्मास्वाद-सहोदरः

(2) वेद्यान्तरस्पर्श-शून्यः

(3) लोकोत्तरचमत्कार-प्राणः

(4) ब्रह्मास्वादस्वरूपः

(5) अनुत्तरितः प्रश्नः

101. सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ।
एतदुदाहरणं कस्य ?

(1) व्यञ्जनाव्यापारध्वनेः

(2) अभिधामूलध्वनेः

(3) विवक्षितान्यपरवाच्यध्वनेः

(4) अविवक्षितवाच्यलक्षणामूलध्वनेः

(5) अनुत्तरितः प्रश्नः

102. सङ्केतितार्थस्य बोधिकावृत्तिः का ?

(1) लक्षणावृत्तिः (2) अभिधावृत्तिः

(3) द्रुतावृत्तिः (4) व्यञ्जनावृत्तिः

(5) अनुत्तरितः प्रश्नः

**103.** अधोलिखितेषु कतमा सम्प्रेषणस्य भौतिकी बाधा वर्तते ?

(a) ध्वनिः

(b) पूर्वाग्रहः

(c) अदृश्यता

(d) असावधानी

अधोलिखितस्य गुप्ताङ्कस्य उपयोगं कृत्वा उत्तरं चिनुत :

(1) (a) तथा (b)

(2) (b) तथा (c)

(3) (b) तथा (d)

(4) (a) तथा (c)

(5) अनुत्तरितः प्रश्नः

**104.** निम्नलिखितेषु कतमं कथनं अग्रिम-संगणक-शिक्षण-प्रतिमानस्य संदर्भे सत्यं नास्ति ?

(1) अस्य प्रतिमानस्य केन्द्रबिन्दुः शिक्षार्थिनाम् संज्ञानात्मकसंरचनायाः विकसनमस्ति ।

(2) अस्मिन् शिक्षणस्य सामग्री व्याख्यान-चर्चा-चलचित्रादिरूपेण प्रस्तुता भवति ।

(3) विद्यार्थिनः अधिकं सक्रियाः भवन्ति, शिक्षकस्य च भूमिका अतीवाल्पा भवति ।

(4) अस्य प्रतिमानस्य उद्देश्यः विषयस्य अवधारणानाम् तथ्यानाम् च ज्ञानप्रदानमस्ति ।

(5) अनुत्तरितः प्रश्नः

**105.** ध्वन्यालोकस्य मङ्गलाचरणे विष्णोः कस्य स्वरूपस्योल्लेखः प्राप्यते ?

(1) नृसिंहस्य (2) कृष्णस्य

(3) वामनस्य (4) रामस्य

(5) अनुत्तरितः प्रश्नः

**106.** एकं यन्त्रम् यत् क्षैतिजकायाम् पीठिकायाम् स्थित्वा एकस्य प्रिज्मनामकस्य लैंसनामकस्य च साधनस्य माध्यमेन विशालां पारदर्शितां एकस्मिन् सुशोभितेन छविरूपेण पट्टे प्रक्षेपयति, तत् कथ्यते –

(1) चुम्बकीयम् पट्टम्

(2) विडियो टेप्

(3) ओवर हेड प्रोजेक्टर

(4) स्लाइड प्रोजेक्टर

(5) अनुत्तरितः प्रश्नः

**107.** निम्नलिखितेषु कतमं कथनं सहकारिणः अधिगमस्य शैक्षणिकैः लाभैः सह सम्बद्धं नास्ति ?

(1) इदम् विद्यार्थिनां कृते उच्चस्तरीयस्य चिन्तनस्य, आलोचनात्मकस्य चिन्तनस्य मौखिकस्य च सम्प्रेषणकौशलस्य विकसनाय साहाय्यम् करोति ।

(2) इदम् विद्यार्थिनां प्रशिक्षणं प्रति उत्तरदायि भवति ।

(3) इदम् बौद्धिकाशक्तानां विद्यार्थिनां स्वीयस्य निष्पादनस्य परिशोधनाय साहाय्यम् करोति ।

(4) अस्मिन् शिक्षकाणाम् विद्यार्थिनां च मध्ये शैक्षणिकप्रतिस्पर्धायाः समावेशः भवति ।

(5) अनुत्तरितः प्रश्नः

**108.** निम्नलिखितेषु सूचनाप्रक्रियायाः प्रतिमानानां प्राथमिकं कतमं लक्ष्यं नास्ति ?

(1) विद्यार्थिभ्यः सूचनातः तथ्यतः च परिचयप्रदानम् ।

(2) विद्यार्थिषु बौद्धिकक्षमतायाः विकसनम् ।

(3) समस्यानां समाधानाय समुचितस्य वातावरणस्य निर्माणम् ।

(4) विद्यार्थिषु सामाजिकक्षमतानाम् विकसनम् ।

(5) अनुत्तरितः प्रश्नः

216581 216581 216581 216581

**109.** निम्नलिखितेषु कतमम् एकम् सिस्टम सोफ्टवेर – इत्यस्य प्रकारः वर्तते ?

(1) वर्ड प्रोसेसिंग सोफ्टवेयर

(2) वैब ब्राउजर

(3) ग्राफिक सोफ्टवेयर

(4) ओपरेटिंग सिस्टम

(5) अनुत्तरितः प्रश्नः

**110.** निम्नलिखितेषु कतमः उद्देश्यः शिक्षाम् प्रति प्रणालि-उपागमेन पूर्णतां न याति ?

(1) इदम् अनुदेशन-प्रणालिं प्रभाविरूपेण परिशोधयितुं शक्नोति ।

(2) अनेन स्कूलप्रशासने प्रबन्धने च दक्षता समायतुं शक्नोति ।

(3) इदम् शिक्षाप्रणाल्याम् विद्यामानान् सर्वान् दोषान् परिमार्जयति ।

(4) अनेन परीक्षायां मूल्यांकनप्रणाल्यां च परिशोधार्थं साहाय्यम् प्राप्तुं शक्यते ।

(5) अनुत्तरितः प्रश्नः

**111.** निम्नलिखितेषु कतमं सूचनायाः प्रेषणस्य च यान्त्रिकम् आधुनिकं साधनं सम्प्रेषणरीतिः (मीडिया) च नास्ति ?

(a) स्लाइड प्रोजेक्टर

(b) ओवरहेड प्रोजेक्टर (ओ.एच.पी.)

(c) लिक्विड क्रिष्टल डिस्प्ले प्रोजेक्टर (एल.सी.डी.)

(d) डिजिटल लाइट प्रोसेसिंग प्रोजेक्टर (डी.एल.पी.)

उचितं विकल्पं चिनुत –

(1) केवलम् (b)

(2) केवलम् (a) तथा (b)

(3) केवलम् (c)

(4) केवलम् (c) तथा (d)

(5) अनुत्तरितः प्रश्नः

**112.** निम्नलिखितेषु कतमं कथनं संगणन (कम्प्यूटर) – सहायक – अनुदेशनस्य उपयोगेण सह सम्बद्धम् नास्ति ?

(1) संगणन (कम्प्यूटर) अधिगमेन बालकेषु सहानुभूतिः तदानुभूतिः च सुगम्या अस्ति ।

(2) एतत् शिक्षकाणां विद्यार्थिनां च कृते तथ्यानाम् सूचनानां च प्राप्तेः एकः मुख्यः स्रोतः अस्ति ।

(3) विद्यार्थिनां कृते तेषामधिगमप्रक्रियायां वस्तुनिष्ठा विशिष्टा च सहायता प्राप्यते ।

(4) अनेन विद्यार्थिनां कृते स्व-गत्यनुसारं स्व-कालानुसारं च स्वयं-प्रशिक्षणस्य अवसरः मिलति ।

(5) अनुत्तरितः प्रश्नः

**113.** निम्नलिखितेषु कतमानि घटकानि संगणन (कम्प्यूटर)-सहायकम् अनुदेशनम् अधोलिखितोपलब्धिवतां छात्राणां कृते सर्वाधिकाय लाभाय भवन्ति ?

(a) तत्कालप्रतिक्रिया पुनर्बलनम् च ।

(b) अतिशय (Drill) अध्यवसायः अभ्यासः च ।

(c) सतीर्थ्य-सहयोगः ।

(d) प्रशासनिकस्य अभिलेखस्य संयोजन-संरक्षणम् ।

उचितं विकल्पं चिनुत –

(1) केवलम् (a) तथा (b)

(2) केवलम् (b) तथा (c)

(3) केवलम् (a) तथा (d)

(4) केवलम् (c) तथा (d)

(5) अनुत्तरितः प्रश्नः

114. लोपसंज्ञाया: विधायकसूत्रमस्ति –
(1) हलन्त्यम् (2) अदर्शनं लोप:
(3) तस्य: लोप: (4) आदिरन्त्येन सहेता
(5) अनुत्तरित: प्रश्न:

115. चवर्गस्थ-वर्णानामाभ्यन्तरप्रयत्नो भवति –
(1) ईषत् स्पृष्टम् (2) स्पृष्टम्
(3) विवृतम् (4) अन्त:स्थम्
(5) अनुत्तरित: प्रश्न:

116. महाप्राणप्रयत्नस्था: वर्णा: सन्ति –
(1) प्रथम-तृतीय-पञ्चमा:
(2) द्वितीयचतुर्थौ यणश्च
(3) द्वितीय-तृतीय-पञ्चमा:
(4) द्वितीयचतुर्थौ शलश्च
(5) अनुत्तरित: प्रश्न:

117. दन्तोष्ठेन उच्चारणीयो वर्णोऽस्ति –
(1) वकार: (2) उकार:
(3) सकार: (4) पकार:
(5) अनुत्तरित: प्रश्न:

118. एचोऽयवायव: इत्यस्य सूत्रस्योदाहरणं न विद्यते –
(1) हरये (2) नायक:
(3) विष्णवे (4) गव्यम्
(5) अनुत्तरित: प्रश्न:

119. गुणसन्धे: उदाहरणं विद्यते –
(1) उपेन्द्र: (2) उपैति
(3) गव्यूति: (4) प्रेजते
(5) अनुत्तरित: प्रश्न:

120. संयोगसंज्ञा केषां भवति ?
(1) अज्भिरव्यवहितहलाम्
(2) अज्भि: व्यवहितहलाम्
(3) अचादिव्यवहितहलाम्
(4) अच्सहितहलाम्
(5) अनुत्तरित: प्रश्न:

121. 'अक: सवर्णे दीर्घ:' इति सूत्रेण किं भवति ?
(1) ह्रस्व: भवति । (2) लघु: भवति ।
(3) दीर्घ: भवति । (4) प्लुत: भवति ।
(5) अनुत्तरित: प्रश्न:

122. 'एङि पररूपम्' इति सूत्रेण पररूपं भवति –
(1) हरी + एतौ (2) विश्व + ऊह:
(3) उप + ओषति (4) उप + एधते
(5) अनुत्तरित: प्रश्न:

123. 'विष्णोऽव' कस्य सूत्रस्य उदाहरणं वर्तते ?
(1) एङि पररूपम् इत्यस्य
(2) एङ: पदान्तादति इत्यस्य
(3) आद्गुण: इत्यस्य
(4) एचोऽयवायाव: इत्यस्य
(5) अनुत्तरित: प्रश्न:

124. *शश्छोऽटि* सूत्रस्य विषये पूर्णरूपेण सत्यं वर्तते –
(1) झय: परस्य शस्य छो अटि
(2) झय: परस्य शस्य छो वाऽटि
(3) झय परस्य शस्य छ: वाऽकि
(4) झय: परस्य शस्य छ: वाऽअचि
(5) अनुत्तरित: प्रश्न:

125. 'ष्टुना ष्टु:' इति सूत्रेण ष्टुत्वं भवति –
(1) सकारतवर्गयो: स्थाने ।
(2) सकारटवर्गयो: स्थाने ।
(3) षकारतवर्गयो: स्थाने ।
(4) शकारतवर्गयो: स्थाने ।
(5) अनुत्तरित: प्रश्न:

126. 'वृद्धिरेचि' इति सूत्रेण वृद्धि: भवति –
(1) उप + एति
(2) कृष्ण + एकत्वम्
(3) प्र + ऊह:
(4) प्र + एष्य:
(5) अनुत्तरित: प्रश्न:

**127.** 'मोऽनुस्वारः' इति सूत्रेणानुस्वारो भवति –

(1) नम् + स्यति (2) यशान् + शि

(3) शाम् + तः (4) हरिम् + वन्दे

(5) अनुत्तरितः प्रश्नः

**128.** 'शम्भुर् + राजते' इत्यत्र उकारोत्तर रेफस्य लोपः केन सूत्रेण भवति ?

(1) लोपः शाकल्यस्य इत्यनेन

(2) ढ्रलोपे पूर्वस्य दीर्घोऽणः इत्यनेन

(3) रोऽसुपि इत्यनेन

(4) रो रि इत्यनेन

(5) अनुत्तरितः प्रश्नः

**129.** 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति सूत्रस्योदाहरणमस्ति

(1) गीर्पतिः (2) धूर्पतिः

(3) शम्भू राजते (4) मनोरथः

(5) अनुत्तरितः प्रश्नः

**130.** "शिवो वन्द्यः" इत्यत्र केन सूत्रेण रू इत्यस्य स्थाने उत्वं भवति ?

(1) हशि च इत्यनेन ।

(2) अतो रोरप्लुतादप्लुते इत्यनेन ।

(3) रोऽसुपि इत्यनेन ।

(4) सुपि च इत्यनेन ।

(5) अनुत्तरितः प्रश्नः

**131.** 'भो-भगो-अघो-अपूर्वस्य योऽशि' इति सूत्रेण भवति –

(1) यलोपादेशः (2) रोर्यादेशः

(3) रोः उः आदेशः (4) नकारस्य रेफादेशः

(5) अनुत्तरितः प्रश्नः

**132.** 'झलां जशोऽन्ते' इति सूत्रेण जश्त्वं भवति –

(1) मनस् + रथः (2) कुल + अटा

(3) चित् + रूपम् (4) शम्भुः + राजते

(5) अनुत्तरितः प्रश्नः

**133.** 'रो रि' सूत्रमिदं करोति –

(1) रेफस्य रेफे परे लोपः

(2) रेफस्य रेफे विसर्गः

(3) रेफस्य रेफे सकारः

(4) रेफस्य रकारः

(5) अनुत्तरितः प्रश्नः

**134.** 'धनं ________ सुखं न लभ्यते' इति रिक्तस्थानं पूरयत् ।

(1) चिरम् (2) अलम्

(3) सदा (4) विना

(5) अनुत्तरितः प्रश्नः

**135.** "कष्टः ________ पराश्रयः" इति रिक्तस्थानं अव्ययेन पूरयत् ।

(1) नीचैः (2) खलु

(3) उच्चैः (4) विना

(5) अनुत्तरितः प्रश्नः

**136.** वञ्चकः सदा ________ वदति ।
अत्र समुचितः अव्ययशब्दोऽस्ति –

(1) सत्यम् (2) अकल्पनीयम्

(3) अनर्गलम् (4) मिथ्या

(5) अनुत्तरितः प्रश्नः

**137.** सज्जनानां मैत्री कदा लघ्वी भवति ।
अत्र समुचितः अव्ययशब्दोऽस्ति –

(1) सायम् (2) पश्चात्

(3) पुरा (4) प्रातः

(5) अनुत्तरितः प्रश्नः

**138.** 'स शम्भुः' इत्यत्र सकारस्य लोपो केन सूत्रेण भवति ?

(1) तस्य लोपः इति सूत्रेण ।

(2) हलो यमां यमि लोपः इति सूत्रेण ।

(3) हलि सर्वेषाम् इति सूत्रेण ।

(4) एतत्तदोः सुलोपोऽकोरनञ् समासे हलि इति सूत्रेण ।

(5) अनुत्तरितः प्रश्नः

216581

**139.** अधोलिखितेषु वाक्येषु 'अन्तरा' इत्यस्य अव्ययस्य समुचित: प्रयोगोऽस्ति –
(1) तव मम च अन्तरा देवदत्तोऽस्ति ।
(2) त्वया मया च अन्तरा देवदत्तोऽस्ति ।
(3) त्वयि मयि च अन्तरा देवदत्तोऽस्ति ।
(4) त्वां मां च अन्तरा देवदत्तोऽस्ति ।
(5) अनुत्तरित: प्रश्न:

**140.** हरिशब्दस्य पञ्चमीविभक्तौ रूपक्रमो भवति
(1) हरये हरिभ्याम् हरिभ्य:
(2) हरे: हरिभ्याम् हरिभ्य:
(3) हरे: हर्यो: हरिभ्य:
(4) हरौ हरिभ्याम् हरिभ्य:
(5) अनुत्तरित: प्रश्न:

**141.** पति-शब्दस्य द्वितीया-बहुवचनस्य किं रूपं विद्यते ?
(1) पतीन् (2) पतिन्
(3) पति: (4) पती:
(5) अनुत्तरित: प्रश्न:

**142.** 'आत्मन्' इति शब्दस्य चतुर्थीविभक्तौ रूपाणि भवन्ति –
(1) आत्मन: आत्मभ्याम् आत्मभ्य:
(2) आत्मने आत्मभ्याम् आत्मभि:
(3) आत्मने आत्मभ्याम् आत्मभ्य:
(4) आत्मने आत्मनो: आत्मभ्य:
(5) अनुत्तरित: प्रश्न:

**143.** 'नदी' शब्दस्य षष्ठीविभक्तौ रूपक्रमो वर्तते –
(1) नद्याम् नद्यो: नदीनाम्
(2) नद्या: नद्यो: नदीनाम्
(3) नद्यै नद्यो: नदीनाम्
(4) नद्या: नद्यो: नदीभ्य:
(5) अनुत्तरित: प्रश्न:

**144.** 'पुत्रेण सहागत: पिता' इत्यत्र अव्ययपदम् किम् ?
(1) सह (2) आगत:
(3) पुत्रेण (4) पिता
(5) अनुत्तरित: प्रश्न:

**145.** नपुंसकलिंगे जगत्-शब्दस्य प्रथमा-बहुवचनं वर्तते –
(1) जगन्ती (2) जगत:
(3) जगन्ति (4) जगन्त:
(5) अनुत्तरित: प्रश्न:

**146.** नपुंसकलिंगे दधि-शब्दस्य द्वितीया-बहुवचनं वर्तते –
(1) दधिनी (2) दधीनि
(3) दधिनि (4) दध्नि
(5) अनुत्तरित: प्रश्न:

**147.** 'युष्मद्' शब्दस्य केषां रूपाणां स्थाने ते, वाम्, व: इत्यादेशा भवन्ति ?
(1) त्वाम् युवाम् युष्मान्
(2) तव युवयो: युष्माकम्
(3) त्वत् युवाभ्याम् युष्मत्
(4) त्वयि युवयो: युष्मासु
(5) अनुत्तरित: प्रश्न:

**148.** अस्मद्-शब्दस्य 'मे' इति रूपं प्राप्यते –
(1) षष्ठी-एकवचनस्य
(2) सप्तमी-एकवचनस्य
(3) द्वितीया-एकवचनस्य
(4) तृतीया-एकवचनस्य
(5) अनुत्तरित: प्रश्न:

**149.** 'इदम्' शब्दस्य स्त्रीलिङ्गे षष्ठीविभक्तौ रूपक्रमो भवति –
(1) अस्या: आभ्याम् आसाम्
(2) अस्या: अनयो: आभ्य:
(3) अस्या: अनयो: आसाम्
(4) अस्याम् आभ्याम् आसाम्
(5) अनुत्तरित: प्रश्न:

**150.** 'मनस्' इति शब्दस्य षष्ठीविभक्तौ रूपक्रमो वर्तते –
(1) मनस: मनोभ्याम् मनसाम्
(2) मनसे मनसो: मनसाम्
(3) मनसि मनसो: मनसाम्
(4) मनस: मनसो: मनसाम्
(5) अनुत्तरित: प्रश्न:

# रफ कार्य के लिए स्थान / SPACE FOR ROUGH WORK

216581
216581
216581
216581